प्रकारान्तर यथा,—
"समिता शर्करासर्पिर्निर्म्मिता अपरेऽपि ये।
प्रकारा अमुना तुल्यास्तेऽपि चैतद्गुणाः स्मृताः॥"
इति राजनिर्घण्टः॥

मण्डं, क्ली, पुं, (मन्यते ज्ञायते अनेन अन्नादिकमिति। मन+"अमन्तात् डः।"उणा० १।११३। इति डः।) सर्व्वेषामन्नदध्यादीनामग्ररसः। इत्यमरभरतौ। माड़् इति मात् इति च भाषा॥ (यथा, उत्तररामचरिते ४ अङ्के। १।
"नीवारौदनमण्डमुष्णमधुरं सद्यःप्रसूताप्रियापीतादप्यधिकं तपोवनमृगः पर्य्याप्तमाचामति॥")
सारः। पिच्छम्। इति मेदिनी। डे, २१॥

मण्डं, क्ली, (मण्डतीति। मडि भूषादौ+अच्।) मस्तु। इति मेदिनी। डे, २१॥ (यथा, भागवते। ५। २०। २४।
"समानेन दधिमण्डोदेन परितः॥")

मण्डः, पुं, (मण्डयति क्षेत्रं भूषयतीति मण्डि+अच्।) एरण्डवृक्षः। शाकभेदः। इति मेदिनी। डे, २१॥ मस्तु। भूषा। सारः। पिच्छम्। हेमचन्द्रः॥ (मण्डति वर्षागमे हृष्यतीति मडि+अच्।) दर्दुरः। भक्तादिभवरसः। तस्य लक्षणम्।
"भक्तैर्विना द्रवो मण्डः पेयं भक्तसमन्वितम्।"
इति राजनिर्घण्टः॥
("तक्राल्लघुतरो मण्डः।" इति च, सुश्रुते सूत्रस्थाने ४५ अध्यायः।) अथ मण्डस्य लक्षणं विधिर्गुणाश्च।
"तण्डुलानां सुसिद्धानां चतुर्द्दशगुणे जले।
रसः सिक्थैर्व्विरहितो मण्ड इत्यभिधीयते॥
"शुण्ठी सैन्धवसंयुक्तो दीपनः पाचनश्च सः।
अन्नस्य सम्यक् सिद्धाच्च ज्ञेया मण्डस्य सिद्धता॥
पेया यूषयवागूनां विलेपीभक्तयोरपि॥"
तस्य गुणाः।
"मण्डो ग्राही लघुः शीतो दीपनो धातुसाम्यकृत्।
ज्वरघ्नस्तर्पणो बल्यः पित्तश्लेष्मश्रमापहः॥"
इति भावप्रकाशः॥
अपि च।
"क्षुद्बोधनो वस्तिविशोधनश्च
प्राणप्रदः शोणितवर्द्धनश्च।
ज्वरापहारी कफपित्तहन्ता
वायुं जयेदष्टगुणो हि मण्डः॥
लाजमण्डोऽग्निजननो दाहतृष्णानिवारणः।
ज्वरातीसारशमनोऽशेषदोषामपाचनः॥
वाट्यमण्डोऽग्निजननः शूलानाहविनाशनः।
पाचनो दीपनो हृद्यः पित्तश्लेष्मानिलापहः॥"
वाट्यमण्डो भृष्टयवमण्डः। इति राजवल्लभः॥
(धान्यादिकृतमण्डगुणाः। क्लीवत्वं विवक्षितम्।
"धान्यमण्डं पित्तहरं अमन्नश्चाश्मरीहरम्।
वातलं रक्तशमनं ग्राहि सन्दीपनं परम्॥"
इति धान्यमण्डगुणाः॥

"युगन्धराणां मण्डन्तु श्लेष्मकृद्वातलं मतम्।
पित्तसंशमनीयञ्च मूत्रलं ग्राहणञ्च तत्॥"
इति युगन्धरमण्डगुणाः॥
"रक्तशाल्युद्भवं मण्डं मधुरं ग्राहि शीतलम्।
प्रमेहाणाश्मरीं हन्ति वातलं पित्तहृत्तथा॥"
इति रक्तशालिमण्डगुणाः॥
"मधुरं शीतलं किञ्चित् श्लेष्मलं शोषनाशनम्।
अश्मरीमेहसंछेदी वातलं श्वेततण्डुलम्॥"
इति श्वेततण्डुलमण्डगुणाः॥
"यवमण्ड कषायं स्याद् ग्राहि चोष्णं विपाकि च।"
इति यवमण्डगुणाः॥
"तद्वत् गोधूमसंभूतं मधुरं पित्तवारणम्।"
इति गोधूममण्डगुणाः॥
"ग्लानिमूर्च्छाकरं सद्यः कोद्रवाद्यलतं लघु।"
इति कोद्रवमण्डगुणाः॥
"तद्वच्च क्षुद्रधान्यानां वातलं पित्तकारकम्।
करोति शोफदं गुल्मं प्रतिश्यायादिकोपनम्॥"
इति क्षुद्रधान्यमण्डगुणा॥
इति मण्डवर्गः॥
इति हारीते प्रथमे स्थाने नवमेऽध्याये॥
"मण्डस्तु दीपयत्यग्निं वातञ्चाप्यनुलोमयेत्।
मृदूकरोति स्रोतांसि स्वेदं सञ्जनयत्यपि॥
लङ्घितानां विरिक्तानां जीर्णे स्नेहे च तृष्यताम्।
दीपनत्वाल्लघुत्वाच्च मण्डः स्यात् प्राणधारणः॥
तृष्णातीसारशमनो धातुसाम्यकरः शिवः।
लाजमण्डोऽग्निजननो दाहमूर्च्छानिवारणः॥
मन्दाग्निविषमाग्नीनां बालस्थविरयोषिताम्।
देयश्च सुकुमाराणां लाजमण्डः सुसंस्कृतः।
क्षुत्पिपासासहः पथ्यः शुद्धानान्तु मलापहा॥"
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये॥
"लाजमण्डो विशुद्धानां पथ्यः पाचनदीपनः।
वातानुलोमनो हृद्यः पिप्पलीनागरायुतः॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥)

मण्डकः, पुं, (मण्डेन कृतः इति। मण्ड+संज्ञायां कन्।) पिष्टकविशेषः। माँड़ा इति हिन्दी भाषा॥ यथा,—
"गोधूमा धवला धौताः कुट्टिताः शोषितास्ततः।
प्रोक्षिता यन्त्रनिष्पिष्टाश्चालिताः समिताः स्मृताः॥
वारिणा कोमलां कृत्वा समितां साधु मर्द्दयेत्।
हस्तचालेन या तस्या लोप्त्री सम्यक् प्रसारयेत्॥
अधोमुखघटस्यैतद्विस्तृतं प्रक्षिपेद्बहिः।
मृदुना वह्निना साध्यः सिद्धो मण्डक उच्यते॥"
लोप्त्री लेची इति लोके।
"दुग्धेन साज्यखण्डेन मण्डकं भक्षयेन्नरः।
अथवा सिद्धमांसेन घृतक्षवटकेन वा॥"
तस्य गुणाः।
"मण्डको बृंहणो वृष्यो बल्यो रुचिकरो भृशम्।
पाकेऽपि मधुरो ग्राही लघुर्द्दोषत्रयापहः॥"
इति भावप्रकाशः॥

(माधवीलता। तत्पर्य्यायो। यथा,—
"माधवी स्यात्तु वासन्ती पुण्ड्रको मण्डकोऽपि च।
अतिमुक्तो विमुक्तश्च कामुको भ्रमरोत्सवः॥"
इति च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
गीताङ्गविशेषः। यथा,—
"जयप्रियः कलापश्च कमलः सुन्दरस्तथा।
मङ्गलो वल्लभश्चेति मण्डकाः षट् प्रकीर्त्तिताः॥
जयप्रियो हंसताले लघुमध्ये यदा गुरुः।
ऊनविंशत्यक्षरैर्युक्तो रसे वीरे स वर्त्तते।
लघुर्गुरुर्लघुर्यत्र हंसतालः स उच्यते॥ १॥
कलापो रङ्गतालेन युक्तो रौद्ररसे हि सः।
द्वाविंशत्यक्षरैर्युक्तो लघुरादौ गुरुद्वयम्।
लघुरादौ गुरुद्वन्द्वं रङ्गताल इतीरितः॥ २॥
लघुद्वन्द्वं गुरुश्चैकोऽनिलोऽत्र संगणात्मकः।
पञ्चविंशत्यक्षरैः स्यात् कमलः शान्तहास्ययोः॥३
गुरुरेको लघुद्वन्द्वं त्रिपुटे भगणात्मके।
अष्टाविंशत्यक्षरैस्तु शृङ्गारे सुन्दरे मतः॥ ४॥
आदौ गुरुर्लघुर्मध्ये द्रुतोऽन्ते भृङ्गतालके।
एकविंशत्यक्षरैस्तु वीरे मङ्गलमण्डकः॥ ५॥
षट्पितापुत्रके ताले गलगालगात्मके।
चतुर्त्रिंशदक्षरोऽयं वल्लभो रौद्रके रसे॥ ६॥"
इति सङ्गीतदामोदरः॥

मण्डनं, क्ली, (मण्ड्यते अनेन इति। मडि भूषे+करणे ल्युट्।) भूषणम्। यथा, अभिज्ञानशकुन्तले। १। १४।
"किमिव हि मधुराणां मण्डनं नाकृतीनाम्।"
अलङ्करिष्णुनि त्रि। इति मेदिनी। ने, १०५।
"चतुर्धा मण्डनं वासोभूषामाल्यानुलेपनैः।"
इति महाभारते मोक्षधर्म्मः॥

मण्डपः, पुं क्ली, (मडि+भावे घञ् मण्डः। मण्डं पाति। पा+कः।) जनविश्रामगृहम्। तत्पर्य्यायः। जनाश्रयः २। इत्यमरः। २। २। ६॥ (यथा, देवीभागवते। २। ११। ५०।
"गङ्गातीरे शुभां भूमिं मापयित्वा द्विजोत्तमैः।
कुर्व्वन्तु मण्डपं स्वस्थाः शतस्तम्भं मनोहरम्॥")
देवादिदत्तवेश्म। इति शब्दरत्नावली॥ (यथा-विश्वकर्म्मप्रकाशे ६ अध्याये।
"प्रदक्षिणायास्तु समन्ततो मण्डपो भवेत्।
तस्य चार्द्धेन कर्त्तव्यस्त्वग्रतो सुखमण्डपः॥"
इत्यादिमण्डपविवरणम् तत्रैव विस्तरशो द्रष्टव्यम्॥ मण्डं पिबतीति। पा+कः।) मण्डपानकर्त्तरि त्रि॥

मण्डपा, स्त्री, निष्पावी। इति राजनिर्घण्टः॥ (मण्डपीत्यपि दृश्यते।)

मण्डयन्तः, पुं, (मण्डयति भूषयतीति। मडि+"तॄभूवहिवसिभासिसाधिगडि मण्डिजि, नन्दि-, भ्यश्च।" उणा०। ३। १२८। इति झच् स च षित्।) अन्नम्। वधूसंघः। नटः। अलङ्कारः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

मण्डयन्ती, स्त्री, (मण्डयतीति। मडि+झच् स्त्रियां ङीप्।) योषित्। इति त्रिकाण्डशेषः॥